# अथ पत्रावलंबनम् ।

श्रीकृष्णाय नमः ।

लौकिको वैदिकश्चैव व्यवहारो द्विधा मतः ।
लोकसिद्धं पुरस्कृत्य वैदिके बोध्यते यथा ॥ १ ॥
लोके शब्दार्थसंबंधो रूपं तेषां च यादृशम् ।
न विवादस्तत्र कार्यो लोकोच्छित्तिस्तथा भवेत् ॥ २ ॥
ब्रह्मवादे निरुक्तिस्तु न वक्तव्यैवकुत्रचित् ।
वस्तुतो ब्रह्म सर्वं हि व्यवहारस्तु लोकतः ॥ ३ ॥
ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्तिताः ।
तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित् ॥ ४ ॥
कांडत्रयार्थसिद्ध्यर्थं स्वाध्यायविधिरुच्यते ।
वाक्यत्रयं तथा वेदे–"स्वाध्यायोऽध्येतव्यः" ॥ ५ ॥
"अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" ॥
"सांगो वेदोऽध्येयो ज्ञेयश्च" इति अनारभ्योक्तमेव हि
एकार्थता तु सर्वत्र विशेषोऽप्युच्यते स्फुटः ॥
स्वाध्यायशब्दो वेदे हि रूढो योगोऽपि वर्तते ॥ ६ ॥
सुष्ठ्वा समंताद्ध्येयः शोभनं नियमैर्युतम् ।
देशे काले गुरौ स्वस्मिन्येऽपेक्ष्यंते गुणा इह ॥ ७ ॥
आ सर्वतः पुनस्तत्र यथा शंका न जायते ।
शब्दे ह्यर्थे ह्यनुष्ठाने तथाऽध्येयो हि वैदिकैः ॥ ८ ॥

अपर्णताद्यपहतपाप्मादिसकलैर्गुणैः ।
प्रजापतिमुखैर्वेदो यथा हि पठितः पुरा ॥ ९ ॥
तादृग्गुणविशिष्टोऽत्र वेदः स्वाध्याय उच्यते ।
तव्यस्त्वावश्यके प्रोक्तो न विधिर्ज्ञातृबोधनात् ॥१०॥
स्वाध्यायपदतो ज्ञेयं तन्माहात्म्यफलं तथा ।
ज्ञातृज्ञापनतासिद्ध्यै द्वितीयं वाक्यमीर्यते ॥ ११ ॥
वसुरुद्रादित्यवर्षैस्त्रयो वर्णाः क्रमाद्द्विजाः ।
अध्याप्या इति तस्यापि नियोगः श्रुतिचोदितः ॥१२॥
पराधीनतया बाले न विधिः श्रुतिचोदितः ।
तथाध्यापनसिद्ध्यर्थं तृतीयं वाक्यमीर्यते ॥१३॥
सांगेऽधीते तथा ज्ञाते स्वध्यायस्तस्य सिद्ध्यति ।
अध्यापनप्रयुक्तं हि प्रथमं लिंगयोगतः ॥१४॥
आत्मनेपदतः स्वस्य स्यातां वृत्तिश्च सेत्स्यति ।
उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ॥१५॥

सरहस्यं तदंगं च तमाचार्यं प्रचक्षते ॥
"आचार्यवान्पुरुषो वेद" ॥
"आचार्यं मां विजानीयाद्" ॥
"गच्छेदाचार्यसंसदि" इति ॥

स्वातंत्र्ये वयसा जाते तस्यावश्यकमीर्यते ॥१६॥
मर्यादाभंगतः केचित्कृत्ये विध्यर्थतां जगुः ।
शब्दार्थमनपेक्ष्यैव निर्णयं च स्वबुद्धितः ॥१७॥

अध्यापनप्रयुक्तं हि तस्माद्ध्यापेनं मतम् ।
एतर्ह्यपि तथैवैतन्न कार्यं कल्पनं ततः ॥१८॥
तत्र संशयमापन्ना बुद्धिर्वाक्यार्थनिर्णये ।
एकवाक्यत्वसंदेहादैकार्थ्याभावतः स्फुटम् ॥१९॥
स एकोऽर्थोऽत्र वक्तव्यो यच्छरीरप्रवेशतः ।
एकार्थतां श्रुतिर्याति तदभावे तु निष्फला ॥२०॥
कुंठितैव भवेन्नूनं वेदाध्ययनबोधने ।
वेदोऽखिलोधर्ममूलं धर्मो यस्यां मदात्मकः ॥२१॥
एवं पूर्वर्षिभिः प्रोक्तं जैमिनिः प्रथमं स्वयम् ।
निश्चित्य लोकशिक्षार्थमर्थप्राधान्यतस्तथा ॥२२॥
धर्मं विचारयामास प्रामाण्यादिपुरःसरम् ।
संदेहस्तु पुनर्जातो वेदांतेषु यथा पुरा ॥२३॥
एकवाक्यत्वमेषां हि धर्मकांडे कथं भवेत् ।
धर्मः पंचविधो द्वेधा षड्भिः संपद्यते तु सः ॥२४॥
देशकालद्रव्यकर्तृमंत्रकर्मविभेदतः ।
सर्वो वेदस्तेषु लीनो वेदांतेषु विचार्यते ॥२५॥
यदेव विद्ययेत्याह ब्रह्मा ब्रह्मिष्ठ एव च ।
तज्ज्ञानं तेषु हि प्रोक्तं कतृशेषास्ततस्तु ते ॥२६॥

१ अध्ययनम्.

ज्ञाननिष्ठाय देयानि कव्यानीति यथा तथा ।
फलश्रुत्या पूर्वकांडसमाप्त्या चावगम्यते ॥२७॥

ब्रह्मविद्ब्रह्म भवति परं वाप्नोति कुत्रचित् ।
"वेदमनूच्य आचार्यः" इत्युक्तोपनिषद्वचः ॥२८॥

शास्त्रांतरेऽप्येवमेव वैदिकानांमतस्तथा ।
अतः स्वतंत्रता वाच्या तथा चेन्नैकवाक्यता ॥२९॥

"वेदोऽखिलो धर्ममूलम्" इत्यादिश्च विरुद्ध्यते ।
वैदिकानामभिध्यानं स्वरादिनियमैर्युतम् ॥३०॥

वेदा एव न चान्यार्था वाच्या बुद्धिमता क्वचित् ।
अतो वेदांतवाक्यान्याप्रसिद्धिः वैदिकानामपि तथैव प्रसिद्धिरिति चेत् ॥ एवं लोकसिद्धस्य जगतो लोकप्रतीतिं बाधित्वा ब्रह्मत्वेनालौकिकत्वं संपाद्यत इति अर्धजरतीयन्यायात्तदंतत्वम् । ननु लोकनिपुणाः कथं मन्यंते ॥ शब्दार्थविचारेणेति ब्रूमः । कथम् । शब्दानामर्थे विचार्यमाणे ब्रह्मैव सर्वं भवति॥ घटपटादिशब्दा धर्मवाचका एव भवितुमर्हंति । घटत्वादिविशिष्टवाचका ह्येत इति लोकप्रसिद्धिः । घटत्वमिति घटगतो धर्मः कश्चित्तत्सद्भावात् घटपदवाच्यताधर्मिणः "तस्य भावस्त्वतलौ" इति त्वो भावप्रत्ययः । भाव इति भूधातोर्घञि रूपम् ।

भूधातुः सत्तायां व्याप्तौ वा । उभयथापि व्यापकस्य सतो वा धर्मस्यवाचको भवति । घञ्स्वार्थे ॥ अन्यथा अनवस्था स्यात् ॥ तथा च घटत्वं नाम सतः व्यापकस्य वा धर्म इत्युक्तं भवति । एवं पटत्वादिष्वपि । तथा च प्रकृत्यर्थः सन व्यापको वा यदा भवति तदैव प्रत्ययार्थैनैकवाक्यता भवति । ततश्च सर्वेषामेकार्थता स्यात् । अत आकृतिविशेषव्यंग्या धर्मास्ते भिन्ना एव शक्तिसंकोचेन व्यवहारसिद्ध्यर्थमंगीकर्तव्याः । तथा च घटादिशब्दाः अरुणादिशब्दवद्धर्मवाचका न स्वरूपतः सतो भिन्नाः प्रत्यक्षतः स्वीकर्तव्या इति वाच्यम् । कारणीभूतस्य सतः एकत्वात्कार्ये कुतो भेदः समायाति । मृद इवांशभेदादिति चेत् । अस्तु तर्हि अंशेन भेदः । अस्तिकः संदेहः कार्यकारणयोर्भेद इति चेत् । न कार्ये समवेतत्वात्कारणमप्यस्तीति मंतव्यम् । तथा च कार्ये द्विगुणगुरुत्वापत्तिः, न वा भेदः प्रतीयेत । पिंडावस्था गता घटावस्था जातेत्येव प्रतीतिः । तथा चाकृतिरेव भिन्नेति धर्मभेद एव जात इति वक्तव्यम् । तथा च सतोऽप्यंशेन धर्मभेद एव जगज्जातमिति सदेकमेव । न चांशांशिनोर्भेदः सिद्ध्यति । पूर्ववदेव द्विगुणभारापत्तेः । अंशाना-

मिव परस्परं भेदो नाम नानात्वं चेत्। ओमित्यत्र केचित्। "बहु स्याम्" इति श्रुतेः। वस्तुतस्तु "पूर्णात्पूर्णमुदच्यत" इति श्रुतेर्नाशेन नानात्वम्। कार्यावस्थायां व्यापकत्वस्य तिरोभाव एव। अथा-न्योन्याभावः स च प्रतियोगितावच्छेदकारोपापवा-दलक्षणः। तथा च घटत्वं पटत्वं चैकत्र नास्तीत्युक्तं भवति। नैतत्सारम्। सति द्रव्ये पार्थिवे च द्वयो-र्विद्यमानत्वात् सर्वगुणप्रसिद्ध्यै तथा प्रकटस्य धर्म-स्य वैषम्यलक्षणानि बंधना प्रतीतिः नटस्ये व नाना-रूपेण प्रकटस्य रूपद्वये भेदप्रतीतिवत्। श्रुतिस्मृति-विद्वत्प्रतीत्या वस्तुनः एकत्वे सिद्धे प्रतीतिर्धर्मनि-बंधनैव। तर्हि धर्माः स्वतो धर्मिणश्च भिन्ना इति सिद्धम्। नैतदप्यस्ति। तस्यैव प्रथमं धर्मरूपेणा-विर्भावात्। "नाऽब्रह्मैवार्थः प्रतीयते"॥

अतः कृतापि जिज्ञासा कुंठितैव भवेद् ध्रुवम् ॥३१॥
अनारभ्याधीतगार्ह्यस्मार्ता इव भवेद्यदि।
प्रक्रिया महता वृत्तिः स्वातंत्र्यं चात्र तेन न ॥३२॥
धर्मार्थकाममोक्षाख्यं श्रेयः स्मार्तं न वैदिकम्।
पुरुषेक्षावशेनैते साध्यसाधनतां गताः ॥३३॥
अलौकिको हि वेदार्थः प्रमाणांतरगो न हि।
परमात्मविचारेण ते चत्वारो ह्यलौकिकाः ॥३४॥

धर्मे ब्रह्मणि च प्रोक्ता विराजमभिपद्यते । अमृती भवति "प्रजापतेरेव सायुज्यमुपैतीदं सर्वं प्रजापतिः । न स पुनरावर्तते । वसीयान्भवति स निमेष्यन् । कामुका एव स्त्रियो भवंति" । "य एवं वेद प्रतितिष्ठति अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन" इत्यादि-फलत्वेन तथैव ते ॥३५॥

अथ वेदाध्ययनं ब्रह्मचर्यं वेदांताध्ययनं संन्यास इति तद्विचारः पृथगेव समासिश्च श्रूयते शिक्षायां "वेदमनूच्याचार्योंतेवासिनमनुशास्ति" इत्यादिना उपनिषदनंतरं पठिताचार्यांतरेऽपि गुणोपसंहारन्या-येन पूर्वकांडाध्ययनमेव ब्रह्मचर्यं नोत्तरकांडस्य सौकर्यार्थमेव पाठांतरम् । इदानीं विचारस्तु पश्चा-द्देवेति नैकवाक्यता । अत एव विचारोऽपि पृथ-गेव सांगोपनिषद इति पृथक्पुराणेषु निर्देश इति ॥ अथवा कुत्रापि आश्रमे विचारोऽस्तु, नैकवाक्यता, न वेदत्वमुपनिषदाम् । स्वरादिनियमस्तदंताना-मपि आचारपरंपरया । वाक्येन तूपयोगो "यदेव विद्यया करोति" इति ॥ तर्यापि कथमुपयोग इति

१ पूर्वकांडविचारो जैमिनिना कृतः उत्तरकांडविचारो व्यासेन कृत इत्यतस्तयेत्यर्थः.

चेत् । उच्यते । लौकिकेषु पदार्थेषु सांगो यज्ञोऽध्यस्यते वैदिके तत्रार्थे वैदिकता संपद्यत इति ब्रह्मवादेन सर्वस्यापि ब्रह्मत्वेऽवगते ब्रह्मण्येव यज्ञः प्रतिष्ठितोऽपि भवति। अयज्ञकालेऽपि वैदिकत्वं सिद्ध्यति न तु वेदांतत्वम् ।कथम्॥

तत्र कृष्णप्रसादेन मायावादो निराकृतः।
आवैदिको महादेवस्तत्र साक्षी न संशयः ॥ १ ॥
ये वैदिका महात्मानस्तेषां चानुमतिस्तथा।
अवेदविन्न मनुते मया चोपेक्षितः पुनः ॥ २ ॥
स्थापितो ब्रह्मवादो हि सर्ववेदांतगोचरः।
काशीपतिस्त्रिलोकेशो महादेवस्तु तुष्यतु ॥ ३ ॥
कस्यचित्त्वथ संदेहः स मां पृच्छतु सर्वथा।
न भयं तेन कर्तव्यं ब्राह्मणानामियं गतिः ॥ ४ ॥
डिंडिस्तु वादितो द्वारि विश्वेशस्य मयात्र हि।
विद्वद्भिः सर्वथा श्राव्यं ते हि सन्मार्गरक्षकाः ॥ ५ ॥

इति श्रीवल्लभदीक्षितानां पत्रावलंबनमिदं समाप्तम् ।